शत्यङ्गुलत्वम्। कण्ठमानमुक्तं कालोत्तरे "खाताद्बाह्येऽङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः"। खातमेखलयोरन्तराले अङ्गुलमानेन कण्ठमोष्ठापरपर्य्यायं कुर्य्यात्। सारसमुच्चये "खाताद्बाह्याङ्गुलः कण्ठस्तद्बाह्ये मेखला क्रमात्। मेखलालक्षणमुक्तं कामिके" "क्षेत्रार्कांशेन तस्यौष्ठः स्यात्तद्वेदर्त्तुभागतः। मेखलापृथुतोच्छ्रायः कुण्डाकारा तु मेखला। सर्व्वेषान्तु प्रकर्त्तव्या मेखलैकात्र लाघवात्"। क्षेत्रस्य अर्कांशेन—द्वादशांशेन कुण्डस्यौष्ठः कण्ठशब्दवाच्यः स्यात् तद्वेदभागतः कुण्डचतुर्थांशतो मेखलायाः पृथुता विस्तारः। तथा ऋतुभागतः षष्ठभागेन मेखलोच्छ्रायः कार्य्यः। पिङ्गलामतेऽपि "खातादेकाङ्गुलं त्यक्त्वा मेखलानां स्थितिर्भवेत्। मेखलैकाथवा तिस्रो भूतसंख्याथवा प्रिये"। भूतसंख्याः—पञ्चसंख्याः। उक्तञ्च प्रयने "कण्ठाङ्गुलाद्बहिः कार्य्या मेखलैका षडङ्गुला। चतुस्त्र्यङ्गुला यद्वा तिस्रः सर्व्वत्र शोभनाः"। यदा एका मेखला तदा सा विस्तारोत्सेधाभ्यां षडङ्गुला विधेया "एका षडङ्गुलोत्सेधविस्तारा मेखला मतेति" पिङ्गलोक्तेः। यदा तु मेखलात्रयपक्षस्तदा क्रमेण चतुस्त्रिद्व्यङ्गुलमानाः कर्त्तव्याः। मोहचूडोत्तरे "मेखलात्रितयं कार्य्यं कोणरामयमाङ्गुलैः। कोणाः—चत्वारः। रामाः—त्रयः। यमौ—द्वौ। तत्र सर्व्वान्तिमा, द्व्यङ्गुला। मध्यस्था त्र्यङ्गुलाः। कुण्डकण्ठसन्निहिता चतुरङ्गुला इति। सत्येवं प्रथममेखलायाः कुण्डकण्ठादारभ्य नवाङ्गुल उत्सेधः स्यात्। लक्षणसंग्रहेऽपि "प्रथमाष्टाङ्गुला व्यासादुन्नता सा नवाङ्गुलैः। मध्या तु त्र्यङ्गुला बाह्ये तृतीया तु यमाङ्गुला। मेखलाः पञ्च वा कार्य्याः षट्पञ्चाब्धित्रिपक्षकैः"प्रथमा कुण्डसन्निहिता आन्तरोत्सेधनवाङ्गुला बाह्ये तु चतुरङ्गुलैव। अब्ध्यङ्गुला—चतुरङ्गुला। अब्धयः—चत्वारः। पक्षौ—द्वौ। योनिलक्षणमुक्तं स्वायम्भुवे "मेखलामध्यतो योनिः कुण्डार्द्धा त्र्यंशविस्तृता। अङ्गुष्ठमानोष्ठकण्ठा कार्य्याश्वत्थदलाकृतिः। प्रागग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखा। पूर्व्वमुखाः स्मृताःशेषा यथाशोभं समन्विताः। मेखलाया गर्भदेशे कुण्डार्द्धदीर्घा कुण्डतृतीयांशविस्तृता योनिःकार्य्या। अत्रौष्ठशब्देन योन्यग्रमुच्यते। कण्ठशब्देन च योनिमेखला अङ्गुष्ठशब्दः, अङ्गुलपर्य्यायः। एकाङ्गुलपरिमाणेन योनेरग्रं मेखलाञ्च कुर्य्यादित्यर्थः "विस्तारोऽष्टाङ्गुलो योनेरग्रमङ्गुलसंमितमिति" पिङ्गलोक्तेः। नारदीये "कुण्डत्र्यंशप्रविस्तारा योनिरुच्छ्रयताङ्गुलम्। कुण्डार्द्धेन तु दीर्घा स्यात् कुण्डोष्ठी बोधिपत्रवत्"। कुण्डोष्ठीति यथा कुण्डे द्वादशांशेन ओष्ठो विहित एवं योनेरपि द्वादशभागेन ओष्ठः कार्य्य इत्यर्थः। तथा कुण्डे प्रविष्टओष्ठो यस्या इति। बोधिपत्रम्, अश्वत्थपत्रम्। त्रैलोक्यसारे "दीर्घात् सूर्य्याङ्गुला नाभिस्त्र्यंशोना विस्तरेण तु। एकाङ्गुलोच्छ्रिता सा तु प्रविष्टाभ्यन्तरे तथा। कुम्भद्वयसमायुक्ता चाश्वत्थदलवन्मता। अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यधृतिस्तथा। दक्षस्था पूर्व्वयाम्येत्र तु वामस्था पश्चिमोत्तरे। नवमस्यापि कुण्डस्य योनिर्द्दक्षदलस्थिता"। सूर्य्याङ्गुला—द्वादशाङ्गुला। त्र्यंशोनेति—दैर्घ्यतृतीयांशन्यूनविस्तारा। एकेनाङ्गुलेनोच्छ्रिता तथा, एकेनाङ्गुलेन कुण्डमध्ये प्रविष्टा। कुम्भद्वयसमायुक्तेति—पूर्व्वोक्ताग्नेयकुण्डस्य तुल्याकृतेर्योनेर्मूलदेशस्थितं वृत्तद्वयमेव गजकुम्भाकृतित्वात् कुम्भशब्देनोक्तम्। तेनात्र कुण्डस्थलाकृतिर्घटद्वयं मृत्पिण्डद्वयं वा स्थाप्यमिति तद्व्याख्यम्। अङ्गुष्ठमेखलेति, एकाङ्गुलमानया मेखलया परिवेष्टितेत्यर्थः! मध्ये त्विति, यथा स्रुचि घृतधारणाय बिलं क्रियते तथा योनिमध्येऽपि बिलं कर्त्तव्यमित्यभिप्रायः। दक्षस्थेति, पूर्व्वाग्नेययाम्यकुण्डेषु दक्षिणभागे उत्तराभिमुखा योनिः कार्य्या नैरृत्यादिकुण्डेषु तु पश्चिमभागे प्राङ्मुखा विधेया। नवम इति, अष्टदिक्षु कुण्डाष्टकं विधाय पूर्व्वेशानदिशोरन्तराले यन्नवमं कुण्डं चतुर्द्दिक्षु वा कुण्डचतुष्टयं कृत्वा ईशानदिशि यत् पञ्चमं कुण्डं तयोरपि दक्षिणभागेऽपि योनिः कार्य्येत्यर्थः"।

तत्र विशेषक्षेत्रफलादिकं कुण्डोद्द्योते उक्तं यथा "शारदातिलके "अष्टास्वाशासु रम्याणि कुण्डान्येतान्यनुक्रमात्। चतुरस्रं योनिरर्द्धचन्द्रं त्र्यस्रञ्च वर्त्तुलम्। षडस्रं पङ्कजाकारमष्टास्रन्तानि नामतः। आचार्य्यकुण्डं मध्ये स्याद्गौरीपतिमहेन्द्रयोरिति" सिद्धान्तशेखरे "पुरन्दरेशयोर्मध्ये वृत्तं वा चतुरस्रकम्। तदाचार्य्यं विनिर्द्दिष्टमिति" अयमुत्तमः पक्षः। अथ पञ्चकुण्डेकैककुण्ड—निवेशनं यथा "आशेशकुण्डैरिह पञ्चकुण्डी चैकं यदा पश्चिमसोमशैवे। वेद्याः सपादेन करेण यद्वा पादान्तरेणाखिलकुण्डसंस्था" आशा—दिक्। तत्र कुण्डानि चतुरस्रवृत्तार्द्धवृत्तपद्मानि ईशदिशि कुण्डं चतुरस्रं वृत्तं वा तैः पञ्चकुण्डीनिवेशनं स्यात् यदा चैकमेव कुण्डं